॥ वाल्मीकि रामायण॥

१ बालकाण्ड

अध्याय १२

पुनः प्राप्ते वसन्ते तु पूर्णः संवत्सरोऽभवत् ।
अभिवाद्य वसिष्ठं च न्यायतः प्रतिपूज्य च ॥ १॥

अब्रवीत्प्रश्रितं वाक्यं प्रसवार्थं द्विजोत्तमम् ।
यज्ञो मे क्रियतां विप्र यथोक्तं मुनिपुङ्गव ॥ २॥

यथा न विघ्नः क्रियते यज्ञाङ्गेषु विधीयताम् ।
भवान्स्निग्धः सुहृन्मह्यं गुरुश्च परमो भवान् ॥ ३॥

वोढव्यो भवता चैव भारो यज्ञस्य चोद्यतः ।
तथेति च स राजानमब्रवीद्द्विजसत्तमः ॥ ४॥

करिष्ये सर्वमेवैतद्भवता यत्समर्थितम् ।
ततोऽब्रवीद्द्विजान्वृद्धान्यज्ञकर्मसु निष्ठितान् ॥ ५॥

स्थापत्ये निष्ठितांश्चैव वृद्धान्परमधार्मिकान् ।
कर्मान्तिकाञ्शिल्पकारान्वर्धकीन्खनकानपि ॥ ६॥

गणकाञ्शिल्पिनश्चैव तथैव नटनर्तकान् ।
तथा शुचीञ्शास्त्रविदः पुरुषान्सुबहुश्रुतान् ॥ ७॥

यज्ञकर्म समीहन्तां भवन्तो राजशासनात् ।
इष्टका बहुसाहस्री शीघ्रमानीयताम् इति ॥ ८॥

औपकार्याः क्रियन्तां च राज्ञां बहुगुणान्विताः ।
ब्राह्मणावसथाश्चैव कर्तव्याः शतशः शुभाः ॥ ९॥

भक्ष्यान्नपानैर्बहुभिः समुपेताः सुनिष्ठिताः ।
तथा पौरजनस्यापि कर्तव्या बहुविस्तराः ॥ १०॥

आवासा बहुभक्ष्या वै सर्वकामैरुपस्थिताः ।
तथा जानपदस्यापि जनस्य बहुशोभनम् ॥ ११॥

दातव्यमन्नं विधिवत्सत्कृत्य न तु लीलया ।
सर्ववर्णा यथा पूजां प्राप्नुवन्ति सुसत्कृताः ॥ १२॥

न चावज्ञा प्रयोक्तव्या कामक्रोधवशादपि ।
यज्ञकर्मसु येऽव्यग्राः पुरुषाः शिल्पिनस्तथा ॥ १३॥

तेषामपि विशेषेण पूजा कार्या यथाक्रमम् ।
यथा सर्वं सुविहितं न किं चित्परिहीयते ॥ १४॥

तथा भवन्तः कुर्वन्तु प्रीतिस्निग्धेन चेतसा ।
ततः सर्वे समागम्य वसिष्ठमिदमब्रुवन् ॥ १५॥

यथोक्तं तत्करिष्यामो न किं चित्परिहास्यते ।
ततः सुमन्त्रमाहूय वसिष्ठो वाक्यमब्रवीत् ॥ १६॥

निमन्त्रयस्य नृपतीन्पृथिव्यां ये च धार्मिकाः ।
ब्राह्मणान्क्षत्रियान्वैश्याञ्शूद्रांश्चैव सहस्रशः ॥ १७॥

समानयस्व सत्कृत्य सर्वदेशेषु मानवान् ।
मिथिलाधिपतिं शूरं जनकं सत्यविक्रमम् ॥ १८॥

निष्ठितं सर्वशास्त्रेषु तथा वेदेषु निष्ठितम् ।
तमानय महाभागं स्वयमेव सुसत्कृतम् ।
पूर्वसम्बन्धिनं ज्ञात्वा ततः पूर्वं ब्रवीमि ते ॥ १९॥

तथा काशिपतिं स्निग्धं सततं प्रियवादिनम् ।
सद्वृत्तं देवसङ्काशं स्वयमेवानयस्व ह ॥ २०॥

तथा केकयराजानं वृद्धं परमधार्मिकम् ।
श्वशुरं राजसिंहस्य सपुत्रं तमिहानय ॥ २१॥

अङ्गेश्वरं महाभागं रोमपादं सुसत्कृतम् ।
वयस्यं राजसिंहस्य तमानय यशस्विनम् ॥ २२॥

प्राचीनान्सिन्धुसौवीरान्सौराष्ट्र्यांश्च पार्थिवान् ।
दाक्षिणात्यान्नरेन्द्रांश्च समस्तानानयस्व ह ॥ २३॥

सन्ति स्निग्धाश्च ये चान्ये राजानः पृथिवीतले ।
तानानय यथाक्षिप्रं सानुगान्सहबान्धवान् ॥ २४॥

वसिष्ठवाक्यं तच्छ्रुत्वा सुमन्त्रस्त्वरितस्तदा ।
व्यादिशत्पुरुषांस्तत्र राज्ञामानयने शुभान् ॥ २५॥

स्वयमेव हि धर्मात्मा प्रययौ मुनिशासनात् ।
सुमन्त्रस्त्वरितो भूत्वा समानेतुं महीक्षितः ॥ २६ ॥

ते च कर्मान्तिकाः सर्वे वसिष्ठाय च धीमते ।
सर्वं निवेदयन्ति स्म यज्ञे यदुपकल्पितम् ॥ २७ ॥

ततः प्रीतो द्विजश्रेष्ठस्तान्सर्वान्पुनरब्रवीत् ।
अवज्ञया न दातव्यं कस्य चिल्लीलयापि वा ।
अवज्ञया कृतं हन्याद्दातारं नात्र संशयः ॥ २८ ॥

ततः कैश्चिदहोरात्रैरुपयाता महीक्षितः ।
बहूनि रत्नान्यादाय राज्ञो दशरथस्य ह ॥ २९ ॥

ततो वसिष्ठः सुप्रीतो राजानमिदमब्रवीत् ।
उपयाता नरव्याघ्र राजानस्तव शासनात् ॥ ३० ॥

मयापि सत्कृताः सर्वे यथार्हं राजसत्तमाः ।
यज्ञियं च कृतं राजन्पुरुषैः सुसमाहितैः ॥ ३१ ॥

निर्यातु च भवान्यष्टुं यज्ञायतनमन्तिकात् ।
सर्वकामैरुपहृतैरुपेतं वै समन्ततः ॥ ३२ ॥

तथा वसिष्ठवचनादृष्यशृङ्गस्य चोभयोः ।
शुभे दिवस नक्षत्रे निर्यातो जगतीपतिः ॥ ३३ ॥

ततो वसिष्ठप्रमुखाः सर्व एव द्विजोत्तमाः ।
ऋष्यशृङ्गं पुरस्कृत्य यज्ञकर्मारभंस्तदा ॥ ३४ ॥

The files in this directory are revised versions of the digital files produced by Professor Muneo Tokunaga, Kyoto University, and copyrighted by him. I am grateful to Professor Tokunaga for his agreement to this use of his original files and for permitting the revised versions to be made publicly available.
Dr J. D. Smith ; email: jds10@cam.ac.uk ; http://bombay.oriental.cam.ac.uk/index.html

ITRANS conversion questions to: Avinash Chopde ¡avinash@acm.org¿

Last updated on March 25, 1998; Send corrections to sanskrit@cheerful.com